अनुशासनं, क्ली, (अनु + शास् + भावे ल्युट् ।) आदेशः । आज्ञा । यथा,—
"इत्येते ब्रह्मणः पुत्त्रा आश्रुत्यात्मानुशासनं" ।
इति श्रीभागवतं ॥ व्युत्पादनं । यथा नामलिङ्गानुशासनमित्यमरः ॥ ( उपदेशः । नियोगकरणं ।
"अहिंसयैव भूतानां कार्य्यं श्रेयोऽनुशासनम्" ।
इति मनुः ।)

अनुशीलनं, क्ली, (अनु पौनःपुन्येन शीलनमभ्यासः, अनु + शीलि + भावे ल्युट् ।) पुनःपुनरभ्यासः । मुहुः सेवनं । यथा,—
"आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा" ।
इति भक्तिरसामृतसिन्धुः ॥

अनुशोचनं, क्ली, (अनु + शुच् + भावे ल्युट् ।) अनुशोचना । तत्पर्य्यायः । मन्युः २ शोकः ३ शुक् ४ । इति जटाधरः ॥

अनुषङ्गः, पुं, (अनु + सन्ज + भावे घञ् ।) कारुण्यं । दया । इति हलायुधः ॥ एकवाक्यान्वितपदस्यान्यवाक्यान्वयः । यथा । कोषोबलचामहतमित्यादौ बलान्वितापहृतस्य कोषेऽन्वयः ॥ न्याये उपनयस्थायम्पदस्य निगमनेऽनुषङ्गः । यथा । वह्निव्याप्यधूमवांश्चायं तस्माद्वह्निमान् ॥ प्रसङ्गः । अन्योद्देशेन प्रवृत्तावन्यस्यापि सिद्धिः । यथा,—
"नित्यक्रियां तथा चान्ये ह्यनुषङ्गफलां श्रुतिं" ।
इति स्मृतिः ॥

अनुष्टुप्, [भ्] स्त्री, (अनु सततं स्तुभ्यतेऽनया, अनु + स्तुभ + क्विप् षत्वं ।) सरस्वती । इति शब्दरत्नावली ॥ अष्टाक्षरपदं छन्दः । सा तु समार्द्धसमविषमवृत्तभेदेन त्रिधा तत्र शेषस्य प्रायिकप्रयोगः । तस्य लक्षणं ।
"पञ्चमं लघु सर्व्वत्र सप्तमं द्विचतुर्थयोः ।
गुरु षष्ठन्तु पादानां शेषेष्वनियमो मतः" ॥
इति छन्दोमञ्जरी ॥ अस्याः प्रस्ताराः २५६ । इति पिङ्गलः ॥

अनुष्ठानं, क्ली, (अनु + स्था + भावे ल्युट्) । कर्म्मारम्भः । करणं । यथा,—
"कृता श्रीभवदेवेन कर्म्मानुष्ठानपद्धती" ।
(उपपादनं । व्यवस्थापनं । उपयोगिता । आनुरूप्यं । कार्य्यकरणं । अभ्यासः । अनुशीलनं । चर्चा ।
"उपपत्तिपरित्यक्तशास्त्रानुष्ठानमोहितैः" ।
इति राजतरङ्गिणी ।
"अस्य नित्यमनुष्ठानं सम्यक् कुर्य्यादतन्द्रित" ।
इति मनुः । शास्त्रविहितकर्त्तव्यादिसम्पादनम् ।
"किन्त्वनुष्ठाननित्यत्वं स्वातन्त्र्यमपकर्षति" ।
इति उत्तरचरिते ।)

अनुष्णं, क्ली, (न उष्णं, नञ्समासः ।) उत्पलं ।
इति राजनिर्घण्टः ॥

अनुष्णः, त्रि, (न उष्णः, नञ्समासः ।) अलसः ।
इत्यमरः ॥ उष्णभिन्नः । शीतलः । बहुव्रीहौ तु अगुणः ॥

अनुष्णवल्लिका, स्त्री, (अनुष्णा शीतला वल्लीव, कर्म्मधारयः ।) नीलदूर्व्वा । इति राजनिर्घण्टः ॥

अनुसन्धानं, क्ली, (अनु + सम् + धा भावे ल्युट् ।) अन्वेषणं । चेष्टा । इत्यादिकाव्यानुसन्धानबलादिति काव्यप्रकाशः ॥

अनुसारः, पुं, (अनु + सृ + भावे घञ् ।) अनुसरणं । अनुयानं । अनुक्रमः । यथा,—
"अथ लौहविधिं वक्ष्ये लौहशास्त्रानुसारतः" ।
इति वैद्यकसुखबोधः ॥

अनुहार,पुं, (अनु + हृ + घञ् ।) अनुकारः । सदृशीकरणं । सदृशरूपवेशभाषाद्याविष्करणं । इत्यमरः ॥ उपमा । इति हेमचन्द्रः ॥
("तद्रूपानुहारस्तु हेतौ सत्यप्यतद्गुणः" ।
इति साहित्यदर्पणे ।)

अनुक्षणं, क्ली, (क्षणे क्षणे वीप्सायामव्ययीभावः ।) प्रतिक्षणं । सर्व्वदा । अनवरतं । क्षणशब्दस्य वीप्सार्थानुपसर्गेणाव्ययीभावसमासः ॥

अनूकं,क्ली, (अनु + उच् + घञर्थे कः, न्यङ्क्वादीनाञ्च इति कुत्वम् ।) कुलं । वंशः । शीलं । स्वभावः ।
इति मेदिनी ॥

अनूकः,पुं, (अनु + उच् + घञर्थे कः, न्यङ्क्वादीनाञ्च इति कुत्वम् ।) गतजन्म । पूर्व्वजन्म । इति मेदिनी ॥
(वंशः । कुलं । स्वभावः । शीलं ।
"अनूकं तु कुले शीले पुंसि स्यात् गतजन्मनि" ।
इति मेदिनी ।)

अनूचानः, पुं, (अनु + ब्रु + लिट् तस्य कानच् ।) साङ्गवेदविचक्षणः । शिक्षादिषडङ्गसहितवेदवेत्ता । इत्यमरः ॥
("इदमूचुरनूचानाः प्रीतिकण्टकितत्वचः" ।
इति कुमारसम्भवे ।
"ऋषयश्चक्रिरे धर्म्मं योऽनूचानः स नो महान्" ।
इति मनुः ।)

अनूचानः, त्रि, (अनु + वच् + लिट् तस्य कानच् । वेदस्यानुवचनं कृतवान्, उपेयिवानित्यादिना साधु ।) विनीतः । सविनयः । इति मेदिनी ॥
(साङ्गवेदविचक्षणः ।
"अनूचानो विनीते स्यात् साङ्गवेदविचक्षणे" ।
इति मेदिनी ॥
शिक्षाकल्पादिषडङ्गसहितवेदाध्ययनकारी, यथा,
"इदमूचुरनूचानाः प्रीतिकण्टकितत्वचः" ।
इति कुमारसम्भवे ।
"ऋषयश्चक्रिरे धर्म्मं योऽनूचानः स नो महान्" ।
इति मनुः ।) ॥

अनूढः, त्रि, (वह + कर्म्मणि क्तः संप्रसारणं ततो नञ्समासः ।) अविवाहितः । आइबड़ इति भाषा । यथा, —
"परिवेत्तानुजोऽनूढे ज्येष्ठे दारपरिग्रहात्" ।
इत्यमरः ॥

अनूद्यं, त्रि, (अनु + वद् + क्यप् संप्रसारणं ।) अनुवाद्यं । अनुवदनीयं । अवदनीये कुत्समर्थं । इति संक्षिप्तसारव्याकरणं ॥

अनूनं,त्रि (न ऊनं, नञ्समासः ।) अखण्डं । समग्रं । पूर्णं । इति जटाधरः ॥ (अहीनः । अन्यूनः ।
"इमामनूनां सुरभेरवेहि" । इति रघुवंशे ।)

अनूनकं,त्रि, (न ऊनं, नञ्समासः, ततः स्वार्थे कन् ।) सकलं । पूर्णं । अखण्डं । इत्यमरः ॥

अनूपं, त्रि, ( अनुगता आपोऽत्र, समासान्त अच्, अस्य उत्वं ।) जलबहुलदेशः । जलप्लावितस्थानं । तत्पर्य्यायः । जलप्रायं २ । इत्यमरः ॥ अस्य गुणाः । शीतलत्वं । स्निग्धत्वं । वातश्लेष्मकारित्वं । गुरुत्वञ्च । इति राजवल्लभः ॥ एतद्देशीयजलगुणाः । गुरुत्वं ॥ घनत्वं । पिच्छिलत्वं । मधुरत्वं । श्लेष्मजनकत्वं । स्निग्धत्वं । अग्निनाशित्वं । प्रमेहगलगण्डश्लीपदच्छर्द्दिप्रभृतिरोगकारित्वञ्च । इति राजनिर्घण्टः ॥

अनूपः, पुं, (अनुगता आपोऽत्र, प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपश्चेति बहुव्रीहिः) महिषः ।
इति त्रिकाण्डशेषः ॥ (जलप्रायः । जलबहुलः । बहुम्बुयुक्तः । "अनूपो महिषे नाम्बुप्रायदेशे तु वाच्यवत्" । इति मेदिनी ॥)

अनूपजं, क्ली, (अनूपे जलप्रायदेशे जायते, अनूप + जन् + डः उपपदसमासः ।) आर्द्रकं । इति राजनिर्घण्टः ॥

अनूपदेश, पुं, ( अनूपः जलप्रायः देशः कर्म्मधारयः ।) जलप्रायदेशः । तस्य लक्षणं यथा,—
"नदीपल्वलशैलाद्यफुल्लोत्पलकुलैर्युतः ।
हंससारसकारण्डचक्रवाकादिसेवितः ॥
सरोवराहमहिषरुरोहिकुलाकुलः ।
प्रभूतद्रुमगुल्माढ्यो नानाशस्यफलान्वितः ॥
अनेकशालिकेदारकदलीक्षुविभूषितः ।
अनूपदेशो ज्ञातव्यो वातश्लेष्मामयान्वितः ॥
इति भावप्रकाशः ॥

अनूरुः, पुं, (नास्ति ऊरू यस्य सः ।) सूर्य्यसारथिः । अरुणः । इत्यमरः ॥ ( ऊरुहीनः ।) ॥

अनूरुसारथिः, पुं, ( अनूरुः अरुणः सारथिः रथचालको यस्य सः ।) सूर्य्यः । यथा,—
"गतं तिरश्चीनमनूरुसारथेः" ।
इति माघः ॥

अनृजुः त्रि, (न ऋजुः सरलः, नञ्समासः ।) असरलः । शठः । इत्यमरः ॥
("न पाणिपादचपलो न नेत्रचपलोऽनृजुः" ।
इति मनुः ।)

अनृणी, [न्] त्रि, (ऋणं विद्यतेऽस्य, ऋण + इनि ऋणी,नञ्समासः ।) अऋणी । अधारी । यथा,—
"एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत् ।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा सोऽनृणी भवेत्" ।
इत्याह्निकतत्त्वं ॥ ऋणाभावविशिष्टः । यथा यक्ष उवाच ।
"को मोदते किमाश्चर्य्यं कः पन्थाः का च वार्त्तिका
वद मे चतुरः प्रश्नान् मृता जीवन्तु बान्धवाः" ॥
युधिष्ठिर उवाच ।
"पञ्चमेऽहनि षष्ठे वा शाकं पचति स्वे गृहे ।
अनृणी चाप्रवासी च स वारिचर मोदते ॥
अहन्यहनि भूतानि गच्छन्तीह यमालये ।
शेषाः स्थिरत्वमिच्छन्ति किमाश्चर्य्यमतःपरं ॥
तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना
नैको मुनिर्यस्य मतं प्रमाणं ।